# Somakrita Somanathastutih

# સોમકૃતા સોમનાથસ્તુતિઃ

## Document Information

Text title : Somanathastutih Somakrita

File name : somanAthastutiHsomakRRitA.itx

Category : shiva, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : vAyupurANa. ekaliNgamAhAtmyam . chaturdasho.adhyAyaH - somanAthamAhAtmye mAhendrIvarNanam . 14.17-34 ..

Latest update : October 14, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 19, 2025

*sanskritdocuments.org*

# સોમકૃતા સોમનાથસ્તુતિઃ

(એકલિઙ્ગમાહાત્મ્યે)
સોમ ઉવાચ -
ધત્તે વિશ્વં વિશ્વકૃદ્યો વિધાય
મૂર્તીરષ્ટૌ પાલયન્ યો જગન્તિ ।
દેહે દેહે દીપવત્ સ્વપ્રકાશઃ
કૃત્વા ચાન્તે સઞ્જહારાથ વિશ્વમ્ ॥ ૧૭॥

યસ્ય સ્મૃત્યા પાતકાનામમુષ્મિન્
લોકે લોકસ્યાશુ દુઃખાપહારઃ ।
દુર્વાસા વૈ મુનિરત્રિપ્રસૂત-
સ્તપશ્ચક્રે આનસૂયત્વમીહન્ ॥ ૧૮॥

બ્રહ્માણ્ડાદ્યાં નિઃસૃતાં જહ્નુકન્યાં
દૃષ્ટ્વા ચાસ્યા ઉગ્રતાપાચ્ચ ભૂમેઃ ।
ભેદં મત્વા યાં વ્યવત્તાથ મૂર્ધ્ના
નમસ્તસ્મૈ સોમનાથાય નિત્યમ્ ॥ ૧૯॥

રોષાત્ કામં ભસ્મસાદ્યશ્ચકાર
યોષિદ્રૂપૈર્મોહયન્તં જગન્તિ ।
કૃત્વાઽનઙ્ગં તં ચ સૃષ્ટ્યાર્થમેવ
નમસ્તસ્મૈ સોમનાથાય નિત્યમ્ ॥ ૨૦॥

કૈલાશાદ્રિમુજ્જિહીર્ષું દશાસ્યં
યો વૈ ચક્રે પીડિતં સ્વાઙ્ઘ્રિભારાત્ ।
ઉમાભીત્યા શ્લેષતુષ્ટોઽસ્ય નૂનં
નમસ્તસ્મૈ સોમનાથાય નિત્યમ્ ॥ ૨૧॥

જ્ઞાતું બ્રહ્મા યસ્ય રૂપં તથોર્ધ્વ-
મગાદ્વિષ્ણુરપ્યધસ્તાદ્યદન્તમ્ ।

તાભ્યામન્તસ્તસ્ય ન જ્ઞાત એવ
નમસ્તસ્મૈ સોમનાથાય નિત્યમ્ ॥ ૨૨॥

યજ્ઞધ્વંસં યશ્ચકારોગ્રરૂપો
રૂપો(?)દક્ષસ્યાશુરોષાદ્ભવાન્યાઃ ।
બહૂનિ રૂપાણ્યસૃજદ્ય એકો
નમસ્તસ્મૈ સોમનાથાય નિત્યમ્ ॥ ૨૩॥

પુરા દેવૈર્મન્થને સાગરેઽપિ
તસ્માજ્જાતેષ્વાશુ રત્નેષુ ભૂયઃ ।
વિષં કોઽન્યસ્ત્વદૃતે ભક્ષતે વા
નમસ્તસ્મૈ સોમનાથાય નિત્યમ્ ॥ ૨૪॥

કલૌ પ્રાપ્તેઽનાથવત્સુ
નાથો ભૂત્વા સોમનાથેન નામ્ના ।
પઙ્ગૂનન્ધાન્ દદ્રુકુષ્ઠાદિતમાન્
રોગગ્રસ્તાન્ ત્વદૃતે (કુરુતે) યો નવીનાન્ ॥ ૨૫॥

સૂત ઉવાચ -

એવં સ્તુતઃ સોમનાથઃ સોમેન ક્ષયરોગિણા ।
તુતોષાસ્મૈ કરુણયા સોમં વાક્યમુવાચ હ ॥ ૨૬॥

સોમનાથ ઉવાચ -

યથા ક્ષયી ભવાન્ જાતઃ સોમે(મ) વિદિતમેવ હિ ।
નદ્યાં સ્વામ્યાં સમાપ્લુત્ય સમારાધય સત્વરમ્ ॥

ક્ષીણશાપસ્તતો ભૂત્વા ક્ષીણોઽક્ષીણો ભવિષ્યસિ ॥ ૨૭॥

કૃષ્ણપક્ષે તનુક્ષીણઃ સિતેઽક્ષીણવપુઃ પુનઃ ।
હ્રાસવૃદ્ધ્યા ચ કલયા પક્ષે પક્ષે ભવિષ્યસિ ॥ ૨૮॥

દર્શે દર્શે તુ માં દૃષ્ટ્વા સ્નાત્વા સ્વામ્યાં નિશાકર ।
મોદયસ્વ મ(મુ)દં પ્રાપ્ય જગત્ સ્થાવરજઙ્ગમમ્ ॥ ૨૯॥

સોમનાથો ભવિષ્યામિ ત્વન્નામ્નાઽહં યુગે યુગે ।
યો ભક્ત્યાઽઽરાધયેન્નિત્યં સોમવારે વિશેષતઃ ॥ ૩૦॥

તસ્ય રોગભયં ન સ્યાત્ કિં વા શોકભયં પુનઃ ।

પાપૌઘમખિલં હન્મિ દુઃખતોઽથ ભયં તથા ॥ ૩૧॥

કામમન્યમભીષ્ટં વા દદ્યાં ભક્તસ્ય ચન્દ્રમઃ ।
અહં યાસ્યામિ લિઙ્ગત્વં કલૌ પ્રાપ્તે દૃષન્મયમ્ ॥ ૩૨॥

વાયુરુવાચ -

ઇતિ શ્રુત્વા પ્રણમ્યૈનં તપસ્તમ્વાઽથ ચન્દ્રમાઃ ।
તત્પ્રસાદાદ્વરં પ્રાપ્ય ગતો નક્ષત્રમણ્ડલમ્ ॥ ૩૩॥

એવં સ ભગવાન્ રુદ્રો બહ્વીભિશ્ચ સ્વમૂર્તિભિઃ ।
પાલયામાસ ભુવનં પિતા પુત્રાનિવૌરસાન્ ॥ ૩૪॥

ઇતિ એકલિઙ્ગમાહાત્મ્યે સોમનાથમાહાત્મ્યે સોમકૃતં સોમનાથસ્તુતિઃ સમ્પૂર્ણા ।

- ॥ એકલિઙ્ગમાહાત્મ્યમ્ । ચતુર્દશોઽધ્યાયઃ - સોમનાથમાહાત્મ્યે માહેન્દ્રીવર્ણનમ્ । ૧૪.૧૭-૩૪॥

- .. ekali NgamAhAtmyam . chaturdasho.adhyAyaH - somanAthamAhAtmye mAhendrIvarNanam . 14.17-34 ..

Notes:

Śiva શિવ, as Somanātha સોમનાથ was worshipped by Soma સોમ for relief from the curse by Dakṣa દક્ષ for having favoured only Rohiṇī રોહિણી amongst his 27 wives who were the daughters of Dakṣa દક્ષ.

Somanātha સોમનાથ advises Soma સોમ to take dip in the Svāmī River સ્વામી નદી, relieves him of the disease due to the curse and establishes his path in the NakṣatraMaṇḍala નક્ષત્રમણ્ડલ.

EkaliṅgaMāhātmyam એકલિઙ્ગમાહાત્મ્યમ્, that constitutes a SthalaPurāṇa સ્થલપુરાણ and SthalaMāhātmyam સ્થલમાહાત્મ્યમ્, has been composed in two styles - Paurāṇika પૌરાણિક and Kāvyamaya કાવ્યમય. It includes the descriptions about the manifestation of the Ekaliṅga Śiva Kṣetra એકલિઙ્ગ શિવ ક્ષેત્ર in relation to the story of the duo - Baṣpa Rājā બાષ્પ રાજા - Hārīta Muni હારીત મુનિ, and the lineage of kings of Citrakūṭa ચિત્રકૂટ (now k.a. Cittauṛagaṛha ચિત્તૌડ઼ગઢ઼ ) and Medapāṭa મેદપાટ (now k.a. Mevāṛa મેવાડ઼ ) including Mahārāṇā Kumbhā મહારાણા કુમ્ભા.

Baṣpa Rājā બાષ્પ રાજા is now popularly known as Bappā Rāvala બપ્પા રાવલ.

The VāyuPurāṇam વાયુપુરાણમ્ has been attributed to be the source composition of EkaliṅgaMāhātmyam એકલિઙ્ગમાહાત્મ્યમ્ as the main narrator of the same is Vāyu વાયુ.

EkaliṅgaMāhātmyam - Paurāṇika એકલિઙ્ગમાહાત્મ્યમ્ - પૌરાણિક is composed in 32 chapters that, with a brief summary of each chapter; and the EkaliṅgaMāhātmyam - Kāvyamayam એકલિઙ્ગમાહાત્મ્યમ્ - કાવ્યમયમ્ can be accessed from the respective links given below.

EkaliṅgaMāhātmyam - Kāvyamayam એકલિઙ્ગમાહાત્મ્યમ્ - કાવ્યમયમ્ includes description of the lineage of Baṣpa Rājā બાષ્પ રાજા, Stuti સ્તુતિ of the erudite Mahārāṇā Kumbhā મહારાણા કુમ્ભા i.e. Kumbhakaraṇa કુમ્ભકરણ, and the Pañcāyatana Stuti પઞ્ચાયતન સ્તુતિ. The latter comprises of Stuti-s of Ganeśa ગણેશ, Sūrya સૂર્ય, Nārāyaṇa નારાયણ, Śiva શિવ, Caṇḍikā ચણ્ડિકા and Ekaliṅga Śiva એકલિઙ્ગ શિવ.
It is noteworthy that the Pañcāyatana Stuti પઞ્ચાયતન સ્તુતિ has some names associated with Kumbhā કુમ્ભા such that he is remembered with each of the Deity worshipped with this stuti. Towards conclusion, there is EkaliṅgaNamaskāra એકલિઙ્ગનમસ્કાર.

Encoded and proofread by Ruma Dewan

---

*Somakrita Somanathastutih*

pdf was typeset on October 19, 2025

Please send corrections to *sanskrit@cheerful.com*